‘मनोगतम्’ [०२.०८] ‘मन की बात’ प्रसारण-तिथि: २६-जनवरी, २०२०

- [भाषान्तरं - डॉ.श्रुतिकान्त-पाण्डेयेन सम्भूय बलदेवानन्द-सागर-द्वारा]

प्रसारण-समयः : सायं ६.00 वादने

मम प्रियाः देशवासिनः, नमस्कारः | अद्य जान्युआरि-मासीयः षड्विंशः दिवसोऽस्ति | गणतन्त्र-पर्वणः भूयस्यः शुभकामनाः | २०२०-इत्यस्येदं प्रथमं ‘मन की बात’ -‘मनोगतम्- इति मेलनं वर्तते | अस्य वर्षस्यापि अयं प्रथमः कार्यक्रमः, अस्य दशकस्यापि अयं प्रथमः कार्यक्रमः |

सखायः, अस्मिन् क्रमे ‘गणतन्त्र-दिवस’स्य समारोह-कारणात् भवद्भिः साकं ‘मन की बात’ -‘मनोगतम्- इति प्रसारणस्य काल-परिवर्तनम्, उचितं प्रतीतम्| अत एव, पृथक्-काल-निर्धारणं कृत्वा अद्य मनोगतमिति मनसः वृत्तं भवद्भिः सम्विभाजयामि | सखायः, दिनानि परिवर्तन्ते, सप्ताहानि परिवर्तन्ते, मासाः अपि परिवर्तन्ते, वर्षाणि च परिवर्तन्ते, किन्तु, भारतस्य जनानाम् उत्साहः नैव न्यूनायते, तथा च, वयं किञ्चिदपि न्यूनाः नैव स्मः, वयमपि किञ्चित् कृत्वैव स्थास्यामः | ‘Can do’, - अयं ‘Can do’-इत्यस्य भावः, सङ्कल्पः सञ्जायमानः समुदेति | देशस्य समाजस्य च कृते किञ्चित् नूनं करणीयमिति भावना, प्रतिदिनं, पूर्वतः अधिकतरं दृढतरा भवन्ती अस्ति | सखायः, ‘मनोगतम्’ -इति मञ्चोपरि, वयं सर्वे, पुनरेकवारं समवेताः स्मः | नवीनान् विषयान् चर्चितुं, देशवासिनां नूतनाः उपलब्धीः सभाजयितुं, भारतम् उत्कीर्तयितुं च | ‘मन की बात’ इति सम्विभाजन-शिक्षणयोः सम्भूय च सम्वर्धनस्य, अनन्यतमः समीचीनः सहजश्च मञ्चः सम्वृत्तः | प्रतिमासं सहस्रशः जनाः, अत्र स्वीय-परामर्शान्, निज-प्रयासान्, स्वीयान् अनुभवान् च सम्विभाजयन्ति | तैः समाजः प्रेरितः स्यात्, तादृंशि कानिचन वृत्तानि, जनानाम् असाधारण-प्रयासान् चालक्ष्य चर्चावसरः प्राप्यते |

‘केनचित् कृत्वा प्रदर्शितम्’ – तर्हि किं वयमपि कर्तुं शक्नुमः? किं तं प्रयोगम् अशेष-देशे पुनः कृत्वा, बृहत् किमपि परिवर्तनं प्रवर्तयितुं शक्नुमः? किं तत्, समाजस्य सहज-चरित्ररूपेण विकास्य, तत्-परिवर्तनं, स्थायिरूपेण कर्तुं शक्नुमः? एतादृशानां केषाञ्चन प्रश्नानाम् उत्तराणि अन्वेषयन्, प्रतिमासं ‘मनोगत’ -मिति प्रसारणे, किञ्चित् निवेदनम्, किञ्चित् आह्वाहनम्, किञ्चित् नूनं कृत्वा प्रदर्शनीयमिति सङ्कल्पानां सातत्यं सम्प्रवर्तते | विगतेषु केषुचित् वर्षेषु वयं अनेकान् लघु-लघु-सङ्कल्पान् विहितवन्तः स्यामः | यथा– ‘No to single use plastic’-इति एकलोपयुज्यमानस्य घट्यातोः निषेधः, ‘खादी’ , ‘स्थानिक-वस्तूनां क्रयः’ वा भवेत्, स्वच्छतायाः वृत्तं वा, पुत्रीणां सम्माननं, गर्वस्य चर्चा वा स्यात्, less cash Economy-इति न्यून-रोक्कात्मिकायाः अर्थव्यवस्थायाः नूतन-पक्षस्य वा समर्थनं भवेत् | एतादृशानाम् असंख्यानां सङ्कल्पानां जन्म, अस्माकं मनोगतमिति मनसः लघु-लघु-निर्भार-वृत्तैः शक्यमजायत |तथा च, एतत् सर्वमपि भवन्तः एव समर्थितवन्तः |

अतीव प्रियमेकं पत्रं मया प्राप्तम् | बिहारस्य श्रीमतः शैलेशस्य पत्रेदम् | साम्प्रतं नासौ बिहारे निवसति | तेन कथितं यत् सः दिल्ल्यां ऊषित्वा कस्मिन्श्चित् NGO-इति प्रशासनेतर-संघटने कार्यं करोति | श्रीमान् शैलेशः लिखति– “मोदि-महोदय, भवान् प्रत्येकमपि ‘मन की बात’ -‘मनोगत’ मिति प्रसारणे किञ्चित् विनिवेदयति | तेषु अनेकानि वस्तूनि अहम् अकरवम् | अस्मिन् शीतर्तौ अहं जनानां गृहेभ्यः वस्त्राणि एकीकृत्य अपेक्षावद्भ्यः वितरितवान् | मया ‘मनोगतम्’ -इत्यस्मात् प्रेरणामादाय, अनेकानि कार्याणि आरब्धानि | परञ्च, शनैः शनैः किञ्चित् विस्मृतवान्, किञ्चिच्च परित्यक्तं जातम्! अस्मिन् वर्षे अहं, ‘मनोगतम्’ -आधृत्य चार्टर-इति घोषणापत्रं निर्मितवान्, यस्मिन्, एतेषां सर्वेषां विषयाणां सूचीमेकाम् अकरवम् | यथा जनाः, नूतन-वर्षारम्भे नव-वर्ष-प्रस्तावान् विरचयन्ति | मोदि-महोदय, अयं हि मम नूतन-वर्षस्य सामाजिक-प्रस्तावोऽस्ति | एवं प्रतिभाति यत् एतानि सर्वाणि लघु-लघु-

वस्तूनि सन्ति, किन्तु, बृहत्-परिवर्तनम् इमानि कर्तुं शक्नुवन्ति | किं भवान् एतत् घोषणापत्रं स्वीय-हस्ताक्षरैः अङ्कयित्वा मह्यं प्रति-प्रेषयितुं शक्नोति?”

शैलेश-महोदय! भवत्कृते कोटिशः अभिनन्दनानि शुभकामनाश्च, भवतः नूतन-वर्षस्य प्रस्तावस्य कृते | ‘मनोगतस्य घोषणापत्रम्’ , अयं हि अतितरां नवाचारः वर्तते | अहं मम पक्षतः शुभकामनाः लिखित्वा, एतत् अवश्यं भवन्तं प्रति प्रेषयिष्यामि | सखायः, एतत् ‘मनोगतस्य घोषणापत्रम्’ , यदाहं पठन्नासम्, तदा, अहमपि आश्चर्यम् अन्वभवम् यत् किं एतावन्ति वृत्तानि सन्ति! एतावन्ति हैश्-टैग्स्-इति निश्रेणि-चिह्नानि सन्ति! तथा च, वयं सर्वे मिलित्वा अनेकान् प्रयासान् अपि कृतवन्तः | कदाचित् वयं ‘सन्देश-टू-सोल्जर्स्’ - योद्धृणां कृते सन्देशः-इति स्वीय-सैनिकैः साकं भावात्मकरूपेण दृढतया च आत्मानं संयोजयितुम् अभियानं प्रवर्तितवन्तः, ‘Khadi for Nation - Khadi for Fashion’ –इत्यमुना समाघोषेण खादी-विक्रयम् अतितरां विवर्धितवन्तः | ‘buy local’-इति स्थानिक-वस्तूनां क्रय-मन्त्रम् अङ्गीकृतवन्तः | ‘वयं सुस्वस्थाः चेत् भारतं सुस्वस्थम्’ इति सुस्वास्थ्यस्य जागरूकता विवर्धिता | ‘My Clean India’ आहोस्वित् ‘Statue Cleaning’-इति-प्रयासैः स्वच्छतां सामूहिकान्दोलनं कृतवन्तः | हैश्-टैग् नो टू ड्रग्स् (#NoToDrugs,), हैश्-टैग्-भारतस्य लक्ष्मीः (#BharatKiLakshami), हैश्-टैग्-सेल्फफॉरसोसाइटी (#Self4Society), हैश्-टैग्-StressFreeExam (#StressFreeExams), हैश्-टैग्-सुरक्षा-बन्धनम् (#Suraksha-Bandhan), हैश्-टैग्-Digital Economy (#DigitalEconomy), हैश्-टैग्-Road Safety... (#RoadSafety), अहो! एतानि असंख्यानि सन्ति |

शैलेश-महोदय, भवतः ‘मनोगतस्य घोषणापत्रम्’ दृष्ट्वा अन्वभवम् यत् वस्तुतः सूची एषा अतितरां दीर्घास्ति | आगच्छन्तु, यात्रामेनां सततं प्रवर्तयेम | अस्य ‘मनोगतस्य घोषणापत्रस्य’ कतरत्तरेण निज-रुच्यनुकूलेन विषयेण आत्मानं संयोजयेम | हैश्-टैग्-इति निश्रेणि-चिह्नं उपयुज्य, सर्वैः साकं सगौरवं स्वीयं योगदानं सम्विभाजयन्तु | मित्राणि, परिवारं, तथा च सर्वान् अपि प्रेरयन्तु | यदा प्रत्येकं

भारतवासी पदमेकं चलति तदा अस्मदीयं भारतवर्षं त्रिंशदुत्तर-शत-कोटि-मितानि पदानि अग्रेसरति |अतः चरैवेति-चरैवेति-चरैवेति इति मन्त्रम् अङ्गीकृत्य स्वीय-प्रयासान् सततं कुर्युः ।

मम प्रियाः देशवासिनः, अस्माभिः मनोगतम्-इत्यस्य घोषणापत्रस्य विषये चर्चितम्। स्वच्छतायाः अनन्तरं जनसहयोग-भावना उत वा सहभागितोत्साहः, अन्यैकस्मिन् विषये तीव्रतया वर्धते यद्धि 'जलसंरक्षणम्' इत्यस्ति। जलसंरक्षण-विषये अनेके व्यापकाः नवाचारयुताश्च प्रयासाः देशस्य सर्वेषु भागेषु प्रवर्तन्ते। अहमेतत् वदन् सुतरां प्रसन्नोऽस्मि यत् विगते प्रावृड्कालिके सत्रे आरब्धम् एतत् जलशक्ति-अभियानं जनसहयोगेन अत्यधिकं साफल्यं अधिगच्छति। बहुसंख्यकाः तडागाः पल्वलाश्च निर्मिताः सन्ति। सर्वोपरि वृत्तमस्ति यत् अस्मिन् अभियाने समाजस्य प्रत्येकं वर्गस्य जनैः स्वीयं योगदानं अर्पितम्। साम्प्रतं, राजस्थानस्य झालोर-जनपदं पश्यन्तु - अत्रत्यौ द्वौ ऐतिहासिकौ कूपौ स्थावर-मलिनजलानां पंकानां च निक्षेपौ जातौ। तदा भद्रायुं-थानवाला-पंचायतयोः शतशः जनैः जल-शक्ति-अभियानान्तर्गतं एतयोः पुनर्जीवनस्य दायित्वं निर्व्यूढम्। वर्षापूर्वमेव एते जनाः एतयोः कूपयोः निक्षिप्तानां मलिनजलानां, अपशिष्टानां, पंकानां च निस्तारणे संलग्नाः जाताः। अस्य अभियानस्य कृते कश्चित् श्रमदानं अकरोत् कश्चिच्च धनदानं विहितवान्। अस्य परिणामेन अद्य तत्रत्याः कूपाः जीवनरेखा- रूपेण स्थापिताः। एतादृशी एव कथा उत्तरप्रदेशस्य बाराबंकी-जनपदस्य अस्ति। अत्र त्रिचत्वारिंशत्-प्रहेल-मिते क्षेत्रफले विस्तृता वापी मृतप्राया आसीत्, परं ग्रामीणैः संकल्पशक्त्या तस्यां नवजीवनं संचारितम्। एतस्मिन् महदभियाने तैः कस्यचिदपि अभावस्य बाधा नैव स्वीकृता। एकैकशः अनेके ग्रामाः परस्परं सम्भूय वापीं परितः एकमीटर-मितोच्चं तटबन्धं निर्मितवन्तः। अधुना एषा वापी पूर्णतः जल-सम्भरितास्ति, एनाञ्च परितः पक्षिणां कलरवाः गुंजायमानाः सन्ति। उत्तराखण्डस्य अल्मोड़ा-हलद्वानी-राजमार्गस्य निकटस्थे सुनियाकोट-ग्रामेऽपि जनसहयोगस्य एतादृशः एव दृष्टान्तः सम्मुखं आगतः। ग्रामीणैः जलसंकटं समाधातुं स्वयमेव जलादानाय संकल्पः कृतः। तैः स्वयमेव धनसंग्रहः कृतः, योजना निर्मिता, श्रमदानं जातं येन प्रायशः एक-किलोमीटरमिता जलप्रणालिका संयोजिता, जलौदञ्च-स्थानकञ्च संस्थापितं येन दशकैः लम्बिता समस्या आमूलं सत्वरमेव समाप्ता। तमिलनाडुतः बोरवेल-इति संकीर्णकूपस्य वृष्टि-जल-कर्षणम्-इति प्रयोगस्य नूतनः विचारः

समागतः। एवं सम्पूर्ण-देशतः जलसंरक्षण-सम्बद्धाः अगणिताः कथाः सन्ति याः मम अभिनवभारतस्य संकल्पं सुदृढं कुर्वन्ति। अद्य अखिलः देशः अस्माकं जलशक्ति-विजेतॄणां कथाः श्रोतुम् उत्सुकः अस्ति। अहं भवतः अभ्यर्थयामि यत् जलसंचयस्य जलसंरक्षणस्य वा कृते स्वीयानां परिवेशवर्तिनां च प्रयासानां विवरणानि, चित्राणि, चलचित्राणि च #jalshakti4India इति सम्पर्के अवश्यमेव स्थापयन्तु इति।

मम प्रियाः देशवासिनः, विशेषतश्च मम यविष्ठमित्राणि! अद्य मनोगतम्-माध्यमेन अहम् असम-सर्वकारं असमवासिनश्च 'खेलो इण्डिया' इति 'क्रीड भारतम्' इत्यस्य भव्यायोजनार्थं सुबहु वर्धापयामि। मित्राणि! जान्युआरि-मासीये द्वाविंशतौ दिनाङ्के एव गुवाहाटीनगर्यां तिसृणां 'क्रीड भारतम्'- स्पर्धानां समापनं जातम्। एतासु विभिन्न-राज्यानां प्रायशः षट्सहस्रमितैः क्रीडकैः सहभागित्वं निर्व्यूढम्। एतज्-ज्ञात्वा भवन्तः आश्चर्यान्विताः भविष्यन्ति यत् अस्मिन् महोत्सवे अशीतिमिताः कीर्तिमानाः ध्वस्ताः सगर्वं चाहं घोषयामि यत् एतेषु षट्पंचाशन्मिताः कीर्तिमानाः अस्माकं सुपुत्रीभिः ध्वस्तीकृताः। एषा सिद्धिः सुपुत्रीणां अस्ति। अहं विजेतृभिः सहैव सर्वेभ्यः प्रतिभागिभ्यः अपि वर्धापनं व्याहरामि। सहैव 'क्रीड भारतम्' - स्पर्धानां सफलायोजनेन सम्बद्धेभ्यः कार्मिकेभ्यः, प्रशिक्षकेभ्यः, प्राविधिकाधिकारिभ्यश्च आभारं प्रकटयामि । इदम् अस्मत्कृते अतीव सुखदं यत् प्रतिवर्षं "क्रीड भारतम्' इत्यत्र प्रतिभागिनां संख्या अधिकतरा जायते। इदं सूच्यते यत् विद्यालयस्तरीयेषु बालेषु क्रीडाः प्रति अवधानं समेधमानं दृश्यते। अहं सूचयितुमिच्छामि यत् अष्टादशोत्तर-द्विसहस्रतमे वर्षे यदा "क्रीड भारतम्'-स्पर्धानां आरम्भः जातः तदा स्पर्धालूनां संख्या पंचाशदुत्तर-त्रिसहस्रमिता आसीत् परं केवलं त्रिषु एव वर्षेषु क्रीडकानां संख्या षट्-सहस्रतोऽपि अधिका जाता, अर्थात् प्रायशः द्विगुणिता । इतोऽप्यधिकं, विगत-त्रिवर्षेषु 'क्रीड भारतम्'-इत्यस्य माध्यमेन द्विशताधिक-त्रिसहस्रशः प्रतिभासम्पन्नाः बालाः सम्मुखमागताः। एतेषु अनेके अभावेषु निर्धनतायां च पालिताः सन्ति। 'क्रीड भारतम्' इत्यत्र सहभागिनां बालानां तेषां च, अभिभावकानां धैर्य-संकल्पोपेताः तादृश्यः कथाः सन्ति याः प्रत्येकं भारतवासिनं प्रेरयिष्यन्ति । गुवाहाटी-नगरस्य पूर्णिमा-मंडलस्य

कथां शृण्वन्तु। सा गुवाहाटी-नगरनिगमे स्वच्छताकर्मित्वेन कार्यनिरतास्ति । तस्याः पुत्री मालविका चरणकन्दुक-स्पर्धायां भागं गृहीतवती, तस्याः पुत्रेण सुजीतेन खो-खो-क्रीडायां, द्वितीयेन च पुत्रेण प्रदीपेन हॉकी-क्रीडायां असमस्य प्रतिनिधित्वं निर्व्यूढम् ।

एतादृशी एव गर्वपूर्णा कथा तमिलनाडोः योगानंथनस्य अस्ति । असौ तु बीड़ीनिर्माणकर्मी अस्ति परं तस्य पुत्र्या पूर्णाश्री-इत्यनया भारोत्तोलने स्वर्णपदकं जित्वा सर्वेषां हृदयं विजितम्। यदाहं डेविड्-बेकहमस्य नाम उच्चारयिष्यामि तदा सर्वेषां मनस्सु आन्ताराष्ट्रिक-चरणकन्दुकखेलकस्य नाम आगमिष्यति। परं अस्माकं देशेऽपि डेविड्-बेकहमः अस्ति । तेन च गुवाहाटी-युवक्रीडासु द्वि-चक्रिका-स्पर्धायाः द्वि-शतमीटर-मितायाः स्प्रिंट-इस्यस्याः स्वर्णपदकं विजितमस्ति। कतिपय-दिनेभ्यः प्राक् यदाऽहं अंडमान-निकोबारम् अगच्छम्, तदा ज्ञातं यत् कारनिकोबार-निवासिनः डेविडस्य पितरौ बाल्ये एव दिवंगतौ। पितृव्यः तं चरणकन्दुक-क्रीडकत्वेन द्रष्टुमिच्छति स्म, अत एव प्रसिद्ध-क्रीडकस्य नामानुसारेण तस्य नाम कृतवान्। परं बालस्य मनस्तु द्वि-चक्रिकायां समाहितम् आसीत्। 'क्रीड भारतम्'-इत्यन्तर्गतं तस्य चयनं जातम्, अद्य च एतेन द्विचक्रिका-चालने नूतनः कीर्तिमानः रचितोऽस्ति।

भिवानीनगरस्य प्रशांतसिंह-कन्हैया इत्यनेन पॉल-वॉल्ट-स्पर्धायां स्वीयमेव राष्ट्रियं कीर्तिमानं ध्वस्तीकृतम् । एकोनविंशति-वर्षीयः प्रशांतः कृषकपरिवारतः अस्ति। भवन्तः एतज्-ज्ञात्वा आश्चर्यम् अनुभविष्यन्ति यत् प्रशान्तः मृत्तिकायामेव पॉल-वॉल्टस्य अभ्यासं करोति स्म। एतज्-ज्ञात्वा क्रीडाविभागः, तस्य प्रशिक्षकं दिल्ल्याः जवाहरलालनेहरु-क्रीडाप्रासादे अकादम्याः संचालनाय साहाय्यं प्रदत्तवान्, प्रशान्तश्चाद्य तत्र प्रशिक्षणं प्राप्नोति।

मुम्बई-नगर्याः करीना-शान्क्तायाः प्रसंगः कस्यामपि परिस्थित्याम् अपराजयस्य भावार्थं प्रत्येकं जनं प्रेरयति। करीना शतमीटर-मितायां ब्रेस्ट-स्ट्रॉक-स्पर्धायाः उपसप्तदश-वर्षीये वर्गे राष्ट्रिय-कीर्तिमानसहितं स्वर्णपदकं विजितवती। दशम-कक्षायां पठन्त्याः करीनायाः जीवने ईदृशः अपि अवसरः आगतः यदा जानु-वैकल्येन तया

प्रशिक्षणं त्यक्तमासीत्। परं करीना तस्याश्च मात्रा धैर्यं धारितं, तस्य च परिणामः अस्माकं सर्वेषां पुरतः अस्ति। अहं सर्वेषां क्रीडकानां उज्ज्वल-भविष्यस्य कृते शुभं कामये । एतेन साकं अहं सर्वेषां देशवासिनां पक्षतः तेषां अभिभावकेभ्यः प्रणमामि, यैः बालानां भविष्यनिर्माणे निर्धनता बाधकत्वेन नैव स्वीकृता। वयं सर्वे जानीमः यत् राष्ट्रिय-क्रीडा-प्रतियोगितानां माध्यमेन एकतः क्रीडकाः स्वीयोत्साह-प्रदर्शनस्य अवसरं प्राप्नुवन्ति, अपरतश्च ते अन्यराज्यानां संस्कृतिमपि अनुभवन्ति। अत एव अस्माभिः 'क्रीड भारतम्'- युवजन-स्पर्धाभिः सहैव 'क्रीड भारतम्'-विश्वविद्यालयीय-प्रतियोगितानां चापि आयोजनाय निर्णीतमस्ति।

मित्राणि! आगामि-मासस्य द्वाविंश-दिवसात् आरभ्य मार्च-मासीयं प्रथमं दिनं यावत् ओडिशा-राज्ये कटक-भुवनेश्वरयोः प्रथमानां 'क्रीड भारतम्'-विश्वविद्या- लयीय-खेलानाम् आयोजनं भविष्यति । आसु भागग्रहणाय त्रिसहस्राधिकैः क्रीडकैः प्रवेशः अधिगतः।

मम प्रियाः देशवासिनः! परीक्षाणां कालः आगतः । स्वभावतः सर्वे विद्यार्थिनः स्वीय-सन्नद्धतायाः अन्तिम-रूपसाधने मग्नाः भविष्यन्ति। देशस्य कोटिभिः विद्यार्थिभिः सह 'परीक्षा पे चर्चा' इति कार्यक्रमस्य अनुभवाधारेण अहं सविश्वासं कथयितुं शक्नोमि यत् देशस्य युवजनाः आत्मविश्वासेन पूरिताः सन्ति, कस्यचिदपि च समाह्वानस्य कृते सन्नद्धाः वर्तन्ते ।

मित्राणि! एकतः तु परीक्षा अपरतश्च शीतकालः। एतयोः मध्ये मम आग्रहः अस्ति यत् आत्मानं सुस्वस्थं अवश्यं कुर्वन्तु। किंचित् व्यायामं अवश्यं आचरन्तु, किंचित् खेलन्तु। खेलनं कूर्दनं च स्वास्थ्यस्य मूलमन्त्रमस्ति।

अद्यत्वेऽहं पश्यामि यत् 'फिट इण्डिया'-कार्यक्रमम् अधिकृत्य अनेकानि आयोजनानि भवन्ति। जान्युआरिमासे अष्टादश-दिनाङ्के युवजनैः साइक्लोथॉन-इत्यस्य आयोजनं कृतम्। अस्मिन् सहभागिभिः लक्षशैः देशवासिभिः सुस्वास्थ्य-

संधारणस्य संदेशः प्रसारितः। अस्माकं ‘न्यूइण्डिया’ पूर्णतः स्वस्थं भवेत् - इत्यस्य कृते प्रत्येकं स्तरे ये प्रयासाः दृष्टाः भवन्ति ते उत्साहास्पदाः सन्ति। विगते नवम्बरे आरब्धम् ‘फिटइण्डिया’-विद्यालयीयाभियानं साम्प्रतं फलप्रदं जातमस्ति। अहं सूचितोऽस्मि यत् पंचषष्टि-सहस्रमितैः विद्यालयैः ऑनलाइन-इति सद्यस्कं पंजीकरणम् फिटइण्डिया-स्कूल-प्रमाणपत्रं च अधिगतमस्ति। देशस्य अन्येभ्यः विद्यालयेभ्यः मम आग्रहः अस्ति यत्तेऽपि शारीरिक-गतिविधीनां खेलानां च अध्ययनेन साकं संयोजनं कृत्वा फिटविद्यालयाः भवन्तु। एतेन सहैव अहं सर्वेभ्यः देशवासिभ्यः निवेदयामि यत् स्वीय-दिनचर्यायां शारीरिक-गतिविधीनां संयोजनं अधिकतरं कुर्वन्तु। प्रतिदिनं च स्मरणं कुर्वन्तु यत् वयं सुस्वस्थाः, तर्हि देशः सुस्वस्थः ।

मम प्रियाः देशवासिनः, सप्ताह-द्वय-पूर्वं, भारतस्य पृथक्-पृथक्-क्षेत्रेषु नाना-पर्वणां हर्षोल्लास-पूर्णानि आयोजनानि प्रावर्तन्त | यदा पञ्जाबे लोहड़ी, उत्साहस्य ऊष्मां प्रसारयति स्म, तदा तमिलनाडु-राज्यस्य भगिन्यः भ्रातरश्च, पोंगल-पर्व सभाजयन्ति स्म, महात्मनः तिरुवल्लुवरस्य जयन्तीम् उत्कीर्तयन्ति स्म | एकतः असम-राज्ये बिहू-उत्सवस्य मनोहारिणी शोभा दर्शनीयतां भजते स्म, अपरत्र च, गुजराते सर्वत्र उत्तरायणस्य साडम्बरम् उत्कीर्तनं कर्गद-पतत्रिभिश्च नभः सम्भरितम् आसीत् | एतादृशे काले दिल्ली, एकस्याः ऐतिहासिक-घटनायाः साक्षिणी भवन्ती आसीत् | दिल्ल्यां, महत्वपूर्णः सन्धिरेकः हस्ताक्षरैः अङ्कितो जातः| अनेन साकमेव, प्रायेण पञ्च-विंशति-वर्ष-प्राचीनस्य ब्रू-रियांग-शरणार्थि-सङ्कटस्य, अन्यतमस्य पीडादायकस्य अध्यायस्य अन्तः जातः, अध्यायोऽयं सर्व-कालार्थं समाप्तः | उत्सवाधिक्येषु निज-व्यापृत-दिनचर्या-कारणात्, कदाचित् भवन्तः अस्य ऐतिहासिक-सन्धेः विषये विस्तरेण नाधिकं ज्ञातवन्तः स्युः, अतः चिन्तयामि यत् ‘मनोगतम्’ - प्रसारणे अवश्यं विषयमेनं चर्चेयम् | एषा समस्या नवतेः दशाब्दीयास्ति | विगते शताब्दे सप्त-नवतौ वर्षे जातीयातति-कारणात् Bru Reang- जनजातीयाः मिज़ोरम-तः

निर्गत्य त्रिपुरायां शरणम् आदातुं विवशाः संवृत्ताः | एते शरणार्थिनः उत्तर-त्रिपुरायाः कञ्चनपुर-स्थितेषु अस्थायि-शिविरेषु स्थातुं निर्दिष्टाः | इदन्तु अतितरां पीडादायकं यत् Bru Reang समुदायस्य जनाः शरणार्थिरूपेण निज-जीवनस्य महत्वपूर्णम् अङ्गं प्रणाशितवन्तः | तेषां कृते शिविरेषु जीवन-यापनस्य अर्थः आसीत् – प्रत्येकमपि मौलिक-सौविध्यात् प्रवञ्चनम् | त्रयोविंशति-वर्षाणि यावत् - न गृहं, न भूमिः, न कुटुम्बस्य कृते रोगोपचारार्थं किञ्चिदपि प्रबन्धनम्, तथा च, बालानां कृते न कथञ्चन शिक्षा-व्यवस्था, न च तेषां कृते किञ्चिदपि सौविध्यम् | ईषत् विचारयन्तु, त्रयोविंशति-वर्षाणि यावत् शिविरेषु कठिनासु परिस्थितिषु जीवन-यापनम्, तेषां कृते कियत् दुष्करम् अभविष्यत् | जीवनस्य प्रत्येकमपि पलम्, प्रतिदिनम् अनिश्चित-भविष्यता साकम् अग्रेसरणं, कियत् कष्टप्रदम् अभविष्यत् | प्रशासनानि आयातानि प्रयातानि च, किञ्च एतेषां पीडायाः समाधानं नैव अवाप्तम् | किन्तु एतावन्ति कष्टानि सोढ्वापि भारतीय-सम्विधानं संस्कृतिञ्च प्रति तेषां विश्वासः दृढतरः प्रावर्तत | तथा च अस्य विश्वासस्य परिणामत्वेन तेषां जीवनेऽद्य नवीना प्रभात-वेला आगतास्ति | सञ्जात-सन्धेः अनुसारम्, इतः परं तेषां कृते गौरवपूर्ण-जीवनस्य मार्गः अनावृतो जातः | अन्ततोगत्वा विंशति-विंशति-वर्षस्य[2020] नूतनं दशकम्, Bru-Reang-समुदायस्य जीवने अभिनवायाः आशायाः अभिलाषस्य च किरणमानीतवत् | प्रायेण चतुस्त्रिंशत्-सहस्रं[34000] ब्रू-शरणार्थिनः त्रिपुरायां निवासयिष्यन्ते | एतावदेव नैव, तेषां पुनर्वासार्थं सर्वांगीण-विकासार्थञ्च केन्द्र-सर्वकारः प्रायेण षट्-शतकोटि[600]-रूप्यकात्मकं साहाय्यमपि विधास्यति | प्रत्येकमपि विस्थापित-परिवाराय भूखण्डं प्रदास्यते | गृह-निर्माणार्थं तेभ्यः साहाय्यं प्रदास्यते | अमुना सहैव, तेषां कृते खाद्यान्नादि-प्रबन्धनमपि विधास्यते | ते इतः परं केन्द्र-राज्यसर्वकारयोः जन-कल्याणकारि-योजनानां लाभान् अपि अधिगन्तुं शक्ष्यन्ति | सन्धिरयम् अनेकैः कारणैः अतितरां विशिष्टः अस्ति | अयं 'सहकारि-सङ्घवादस्य' भावनां दर्शयति | सन्धि-हेतोः त्रिपुरा-मिज़ोरमयोः राज्ययोः मुख्यमन्त्रिणौ उपस्थितौ आस्ताम् | सन्धिरयं राज्यद्वयस्य जनतायाः सहमति-शुभकामनाभिः शक्यमजायत | एतदर्थम्

अहं राज्य-द्वयस्य जनतायाः, तत्रत्य-मुख्यमन्त्रिणोः, विशेष-रूपेण कार्तज्ञ्यमावहामि । सन्धिरयं, भारतीय-संस्कृतौ समाहितं करुणाभावं सहृदयतां चापि प्रकटयति । सर्वान् स्वीयान् मत्वा व्यवहर्तव्यम्, तथा च, सम्भूय वर्तितव्यम्, इत्यस्याः पवित्र-भूमेः संस्कारेषु अन्तर्निहितमस्ति । पुनरेकवारम् अनयोः राज्ययोः निवासिनां Bru-Reang-समुदायस्य जनानाञ्च कृते विशेषरूपेण अभिनन्दनं व्याहरामि ।

मम प्रियाः देशवासिनः, 'खेलो-इंडिया' - इति महतीनां क्रीडानां सफलायोजके असम-राज्ये, अपरमेकं महत् कार्यं जातम् । भवन्तः अपि वार्त्तासु दृष्टवन्तः स्युः यत् नातिचिरम् असमराज्ये, पृथक्पृथक् आतङ्कवादिनाम् अष्टानां वर्गाणां चतुश्चत्वारिंशदुत्तर-षट्-शतं जनाः स्वीयायुधैः सह आत्म-समर्पणं कृतवन्तः । ये पूर्वं हिंसामार्गम् अङ्गीकृतवन्तः ते स्वीयं विश्वासं, शान्तौ प्रकटितवन्तः, तथा च, देशस्य विकासे सहभागीभवितुं निर्णीतवन्तः, मुख्य-धारायां च ते प्रत्यागताः। विगते वर्षे, त्रिपुरायामपि अशीत्यधिकाः[80] जनाः, हिंसा-मार्गं विहाय मुख्य-धारायां परावर्तितवन्तः । हिंसाचरणेन समस्याः समाधातुं शक्यते इति विचिन्त्य ये आयुधानि उत्त्थापितवन्तः, तेषां विश्वासोऽयं दृढतरो जातः यत् शान्तिः साहचर्यञ्चैव, कमपि विवादं समाधातुं एक-मात्रं मार्गोऽस्ति । देशवासिनः इदं ज्ञात्वा महतीं प्रसन्ताम् अनुभविष्यन्ति यत् उत्तर-पूर्व-क्षेत्रे विद्रोहः रंहसा अल्पीभूतः, अस्य मुख्य-कारणन्तु इदमेव यत् अमुना क्षेत्रेण सम्बद्धः प्रत्येकमपि विषयः शान्त्या, प्रामाणिकतया, चर्चाञ्च विधाय समाधीयते । देशस्य कस्मिन्नपि कोणे साम्प्रतमपि हिंसायुधानां बलेन समस्यानां समाधानार्थं प्रयतमानान् जनान् अद्याहम्, अस्य गणतन्त्र-दिवसस्य पवित्रावसरे विनिवेदयामि यत् ते प्रत्याग- च्छन्तु । समस्यानां शान्तिपूर्ण-रीत्या समाधानार्थं, स्वस्य, अस्य देशस्य च क्षमतासु च विश्वसेयुः । वयम् एकविंश-शताब्दे स्मः, यद्धि ज्ञान-विज्ञानस्य लोकतन्त्रस्य च युगमस्ति । किं भवन्तः कस्यचित् तादृशस्य स्थानस्य विषये श्रुतवन्तः यत्र हिंसाचरणेन जीवनं भद्रतरं संवृत्तम्? किं भवन्तः कस्यचित् तादृशस्य स्थानस्य विषये श्रुतवन्तः, यत्र शान्तिः सद्भावश्च

जीवनस्य कृते दुष्करौ भवेताम्? हिंसा, कामपि समस्यां समाधातुं नैव क्षमते । संसारस्य कस्याश्चन अपि समस्यायाः समाधानं, कस्याश्चन अपि अपरस्याः समस्यायाः प्रवर्तनेन नैव, परञ्च अधिकाधिकं समाधानान्वेषणेन एव सम्भाव्यते । आगच्छन्तु, वयं सर्वे मिलित्वा, एतादृशस्य अभिनव-भारतस्य निर्माणं करवाम, यत्र शान्तिः प्रत्येकमपि प्रश्नस्य उत्तरस्य आधारः भवेत् । साहचर्यं हि प्रत्येकमपि समस्यायाः समाधानस्य प्रयासे स्यात् । तथा च, भ्रातृत्वं, प्रत्येकमपि विभाजनस्य भेदस्य च प्रयासं निष्फलं कुर्यात् ।

मम प्रियाः देशवासिनः, अद्य गणतन्त्र-दिवसस्य पावनावसरे ‘गगनयानस्’ विषये किमपि संसूचयन् हर्ष-प्रकर्षम् अनुभवामि । देशः, तस्यां दिशि अपरमेकं पदम् अग्रेसृतोऽस्ति । द्वाविंशोत्तर-द्विसहस्रतमे वर्षे, अस्माकं स्वाधीनतायाः पञ्च सप्ततिः वर्षाणि पूर्णतां यास्यन्ति । तथा च, तस्मिन्नवसरे अस्माभिः ‘गगनयान-कार्यक्रमेण’ साकम् अन्यतमं भारतवासिनं अन्तरिक्षं सन्नेतुं विहितः निज-सङ्कल्पः साधनीयोऽस्ति । ‘गगनयान-कार्यक्रमः’ , एकविंशे शताब्दे विज्ञान-प्रविधि-क्षेत्रे भारतस्य ऐतिहासिकोपलब्धिरूपो भविता । अभिनव-भारतस्य कृते अयं ‘मील का पत्थर’ -इति विशिष्टः सेत्स्यति ।

सखायः, भवन्तः जानन्तः स्युः – अस्य कार्यक्रमस्य कृते astronaut-अर्थात् अन्तरिक्ष-यात्रिहेतोः चत्वारः प्रत्याशिनः चिताः सन्ति । एते चत्वारोऽपि युवानो भारतीय-वायु-सेनायाः विमान-चालकाः सन्ति । एते प्रभविष्णवः युवानः, भारतस्य कौशलस्य, प्रतिभायाः, क्षमतायाः, साहसस्य स्वप्नानाञ्च प्रतीकरूपाः सन्ति । अस्मदीयाः एते चत्वारः सखायः, आगामिषु कतिपय-दिनेषु प्रशिक्षणार्थं रशिया-देशं प्रयास्यन्ति । दृढं विश्वसिमि यत् अयं हि भारत-रशिया-देशयोः मध्ये मैत्री-सहयोगयोः अपरः स्वर्णिमाध्यायो भविता । एते युवानः वर्षाधिकावधि-पर्यन्तं प्रशिक्षयिष्यन्ते । तदनन्तरं देशस्य आशायाः आकांक्षायाः च उड्डयनम् अन्तरिक्षं यावत् प्रापणस्य दायित्वं, एतेष्वेव अन्यतमस्योपरि भविता । अद्य गणतन्त्र-दिवसस्य शुभावसरे एभ्यः

चतुर्भ्यः युवभ्यः, अमुना कार्यक्रमेण सम्बद्धेभ्यः भारत-रशिया-देशयोः वैज्ञानिकेभ्यः अभियन्तृभ्यश्च वर्धपनानि व्याहरामि ।

मम प्रियाः देशवासिनः, विगते मार्च-मासे एकं दृश्याङ्कन-पटलं, माध्यमेषु सञ्चार-माध्यमेषु च चर्चा-विषयत्वम् अभजत । चर्चा इयमासीत् यत् केन प्रकारेण सप्तोत्तर-शत-वर्षीया वृद्धा माता, राष्ट्रपति-भवनस्य समारोहे परिसम्विदम् अतिक्रम्य राष्ट्रपति-महोदयाय आशीर्वादं प्रददाति । एषा महिलासीत् – सालूमरदा-थिमक्का, या कर्णाटके 'वृक्ष-माता' इति नाम्ना प्रख्यातास्ति । तथा च, सः समारोहः आसीत् - पद्म-पुरस्कार-प्रदानस्य । साधारण-पृष्ठभूमेः समायातायाः थिमक्का-महोदयायाः असाधारणं योगदानं देशेन अवगतम्, अभिज्ञातम्, सम्मानितञ्च । सा पद्मश्रीति अलङ्करणेन सम्मान्यते स्म ।

सखायः, अद्य भारतं स्वीयानाम् आसां महतीनां विभूतीनां विषये गर्वम् अनुभवति । भूमितलेन सम्पृक्तानां जनानां सम्मानम् अनुष्ठीय गौरवान्वितं जायते । प्रतिवर्षमिव, गतसायं पद्म-पुरस्काराः उद्घोषिताः । ममाग्रहोऽस्ति यत् भवन्तः सर्वे एतेषां विषये अवश्यं पठन्तु । एतेषां योगदान-विषये, परिवारे चर्चां कुर्वन्तु । द्वाविंशोत्तर-द्विसहस्रतम-वर्षस्य, पद्म-पुरस्काराणां कृते, ऐषमः षट्-चत्वारिंशत्-सहस्राधिकानि नामांकनानि प्राप्तानि । चतुर्विंशोत्तर-द्विसहस्रतमे वर्षे, प्रवर्तमानायाः संख्यायाः अपेक्षया एषा विंशतिमित्यापि अधिकतरास्ति । एते अङ्काः प्रत्येकमपि जनस्य विश्वासममुं प्रदर्शयन्ति यत् पद्म-पुरस्काराः, साम्प्रतं जन-पुरस्कारत्वेन विराजन्ते । साम्प्रतं पद्म-पुरस्काराणां कृत्स्नापि प्रक्रिया online-इति सद्यस्कः वर्तते । पूर्वं ये निर्णयाः सीमित-जनानां मध्ये विधीयन्ते स्म, ते साम्प्रतं, पूर्णतया जन-सञ्चालिताः सन्ति । एकतः एवमपि वक्तुं शक्यते यत् पद्म-पुरस्कार-विषये देशे नवीनो विश्वासः सम्मानश्च समुत्पन्नौ स्तः । सम्प्रति सम्मान-प्रापकेषु बहवः तादृशाः भवन्ति ये हि परिश्रमस्य पराकाष्ठामनुष्ठाय भूमितः उत्थिताः सन्ति । सीमित-संसाधनानां बाधाः निज-परिवर्तिनीं गहनां च निराशाम् अपाकृत्य अग्रेसृताः

सन्ति | वस्तुतस्तु तेषां दृढा इच्छाशक्तिः सेवा-भावना निःस्वार्थ-भावश्च, अस्मान् सर्वान् प्रेरयन्ति | अहं पुनरेकवारं सर्वान् पद्म-पुरस्कार-विजेतॄन् वर्धापयामि | तथा च, भवतः सर्वान् साग्रहं निवेदयामि यत् तेषां विषये समधिकं पठन्तु, समधिकायाः सूचनायाः सञ्चयञ्च कुर्वन्तु | तेषां जीवनस्य असाधारण-कथाः, समाजं याथार्थ्येन प्रेरयिष्यन्ति |

मम प्रियाः देशवासिनः, पुनरेकवारं गणतन्त्र-पर्वणः भूयस्यः शुभकामनाः | पूर्णमिदं दशकम्, भवतां जीवने, भारतस्य जीवने, नूतन-सङ्कल्पान्वितं स्यात्, अभिनव-सिद्धियुतं च भवेत् | तथा च, भारतात् यत् अपेक्ष्यते, ताः अपेक्षाः पूरयितुं सामर्थ्यं, नूनं भारतमवाप्नुयात् | अमुना अनन्यतमेन विश्वासेन सहैव आगच्छन्तु – नूतन-दशकस्य शुभारम्भं कुर्मः | नवीनैः सङ्कल्पैः साकं, मातुः भारत्याः कृते समवेताः भवेम | भूरशः धन्यवादाः | नमस्कारः |

*****

- [भाषान्तरं – डॉ.श्रुतिकान्त-पाण्डेयेन सम्भूय बलदेवानन्द-सागर-द्वारा]

दूरभाषः - ९८१० ५६२२ ७७

अणुप्रैषः - baldevanand.sagar@gmail.com